इयम् आकाशवाणी

दिनाङ्कः - 25.11.2024 सायम् - 06:20

मुख्यवार्ताः

- प्रधानमन्त्री नरेन्द्र मोदी अद्य सबलं अवदत् यत् भारतं स्व-भविष्यस्य विकासे सहकारितायाः बृहत्तमां भूमिकां पश्यति इति। श्रीमोदी अद्य भारतमण्डप-स्थाने आई.सी.ए. वैश्विक-सहकारिता-सम्मेलनस्य उद्घाटनं कृतवान्।

- एकं विशिष्टं-व्यवसायि-समूहं विरूध्य उत्कोचस्य आरोपान् अन्यान् च प्रसङ्गान् आलक्ष्य विपक्ष-दलस्य कृत-कोलाहललस्य मध्ये संसद उभयोः सदनयोः उपवेशनम् अद्य आदिनं यावत् स्थगितम् जातम्।

- प्रधानमन्त्री-नरेन्द्रमोदी आशां प्रकटितवान् यत् संसदः शीतकालिकं सत्रं लाभकारी भविष्यति अपि च रचनात्मकं विचार-विमर्शं अपि भविष्यति।

- अंगीकृतस्य संविधानस्य पञ्च-सप्तति-तमस्य वर्षस्य उपलक्ष्ये संविधान-समारोहः श्वः आरभ्य आरप्स्यते।

- ऑस्ट्रेलियादेशस्य पर्थ-स्थले बॉर्डर-गावस्कर-ट्रॉफी-प्रतियोगितायाः क्रिकेट्-निकष-स्पर्धायां भारतेन ऑस्ट्रेलियादले पञ्चनवति-अधिक-द्विशतं धावनाङ्कैः विजयः प्राप्तः।

प्रधानमन्त्री-सहकारितासम्मेलन

प्रधानमन्त्री नरेन्द्र मोदी अद्य सबलं अवदत् यत् भारतं स्व-भविष्यस्य विकासे सहकारिताया: बृहत्तमां भूमिकां पश्यति इति। प्रधानमन्त्री नरेन्द्र मोदी नवदिल्ल्या: भारतमण्डप-स्थाने आई.सी.ए. वैश्विक-सहकारिता सम्मेलनस्य उद्घाटनं कृतवान्। उक्तवान् च यत्।

पीएम् ऑन कोऑपरेटिव-27 सै

अन्ताराष्ट्रिय-सहकारी-संयुते: त्रिंशदधिक-एक-शत-तम-वर्षस्य इति-वृत्ते प्रथमं वारं वैश्विक-सहकारि-सम्मेलनस्य सामान्य-सभाया: च आयोजनं भारते क्रियते। अत्र अवसरे श्रीमोदी पञ्च-विंशति-अधिक-द्विसहस्र-तमे अन्ताराष्ट्रिय-सहकारिता वर्षे स्मारक-प्रैष्य-पत्रम् अपि विमोचितवान्। एतस्मिन् सम्मेलने भूटान-देशस्य प्रधानमन्त्री दाशो-शेरिंग-तोबगे इत्येष: फिजी-देशस्य च उप-प्रधानमन्त्री मनोआ-कामिका-मिका-इत्येष: अपि सम्मिलितौ भवत:। इत: पूर्वं केन्द्रीय-गृहमन्त्री-अमितशाह: समारोहं सम्बोधितवान्।

संसद-स्थगनम्

एकं विशिष्टं-व्यवसायि-समूहं विरूध्य उत्कोचस्य आरोपान् अन्यान्  च प्रसङ्गान् आलक्ष्य विपक्ष-दलस्य कृत-कोलाहललस्य मध्ये संसद उभयो: सदनयो: उपवेशनम् अद्य आदिनं यावत् स्थगितम् जातम्। शीतकालिक-सत्रस्य प्रथमे दिवसे स्थगनस्य अनन्तरं पादोन-द्वादशवादने यदा राज्यसभाया: उपवेशनं पुन: समाब्धम् तदा सभापति: जगदीप-धनखड: विपक्षिदलै: आग्रहं कृतवान् यत् ते सदनस्य कार्याचरणाय सहयोगं यच्छन्तु इति। परञ्च कोलाहल-मध्ये सदनस्य उपवेशनं सम्पूर्ण-दिनं यावत् स्थगितम्। सभापति: उक्तवान् यत् प्रदत्तानि प्रतिवेदनानि निर्देशानाम् अनुरूपाणि नैव सन्ति इति। विपक्षस्य नेता मल्लिकार्जुन-खरगे इत्येष: व्यवसायि-समूहे कथित-उत्कोचानां आरोपाणां प्रसङ्गेषु वाचनस्य प्रयासं कृतवान् परञ्च असौ अनुमतिं न प्राप्तवान्। अत्रावधौ कांग्रेस-वामदल-द्रमुक-राजद-आप-दलानां सदस्यै कोलाहलं कृतम् येन हि कार्याचरणं पादोन-पञ्चवादन-पर्यन्तं प्रचालितम् एव। तत्रैव लोकसभायां कार्याचरणस्य

अनन्तरं मध्याह्ने द्वादशवादने कार्याचरणं समारभत तावत् कांग्रेस-समाजवादीपार्टी-द्रमुकदलानां सदस्या: उत्कोचं आधृत्य समवेतस्वरेण कोलाहलं समाचरितवन्त:। कोलाहलमध्ये पीठासीन-अधिकारी सदनं स्थगितं कृतवान्। सत्रस्य प्रथमे दिने अद्य साम्प्रतिके समये दिवंगताभ्यां सदस्याभ्यां वसन्तराव चव्हाण-शेख-नूरूल-इस्लाम-इत्येताभ्यां श्रद्धाञ्जलि: प्रदत्ता। उभयो: सदनयो: उपवेशनं बुधवासरे भविष्यति।

विराम:

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

प्रधानमन्त्री-संसद्

प्रधानमन्त्री-नरेन्द्रमोदी आशां प्रकटितवान् यत् संसद: शीतकालिकं सत्रं लाभकारी भविष्यति अपि च रचनात्मकं विचार-विमर्शं अपि भविष्यति। संसद: शीतकालिक-सत्रात् पूर्वं वार्ताहरान् सम्बोधयन् श्रीमोदी उक्तवान् यत् इदं सत्रम् संविधानस्य पञ्चसप्तति-वर्षाणां सम्पूर्ति-दिवसस्य कारणेन अपि विशिष्टं भविष्यति।

पीएम्-75 कॉन्स्टीट्यूशन डे-19 सै

श्रीमोदी प्रोक्तवान् यत् इदं सत्रम् लोकतन्त्राय गरिम्ण: प्रपूरितं ऐतिहासिकं भविष्यति। विपक्षस्य आलोचनां कुर्वन् प्रधानमन्त्री अग्रे उक्तवान् यत् जनताद्वारा अस्वीकृता। प्रचिता: च जना: अव्यवस्थाम् एव जनयन्ति। श्रीमोदी अवदत् यत् विश्वमञ्चे देशाय अद्य य: दुर्लभ: अवसर: प्राप्त तस्य लाभ: स्वीकरणीय:।

पीएम् वोटर्स ऑफ इण्डिया-22 सै

लोकसभाध्यक्ष:

लोकसभा-अध्यक्ष: ओम् बिरला: केषाञ्चित् वर्गाणां आरोपाणां खण्डनं कृतवान् यत् संविधानं सङ्कटे अस्ति इति असौ अवदत् यत् अत्र संकीर्ण-मानसिकता न स्वीकरणीया। मङ्गलवासरे संविधान-दिवसात् पूर्वं आकाशवाण्या सह विशिष्टे साक्षात्कारे श्रीबिरला: प्रोक्तवान् यत् संविधानं देशस्य जनै: सम्बद्धं अस्ति समाजस्य च प्रत्येकवर्ग: अस्मिन् विश्वासं करोति इति।

बिरला- कॉन्स्टीट्यूशन-16 सै

संविधान

प्रशासनेन भारतस्य संविधानस्य स्वी-करणस्य पञ्च-सप्तति-तम वर्षस्य स्मणार्थं वर्षपर्यन्तं उत्सवस्य घोषणा कृता। या हि श्व: आरभते। अग्रिमे वर्षे नवम्बरमासस्य षड्-विंशति दिनाङ्क पर्यन्तं सम्पूर्णे देशे उत्सव: अयं प्रचलिष्यति। अवधेयं वर्तते नवचत्वारिंशत् अधिक-नवदश-शत-तमे वर्षे नवम्बरमासस्य षड्विंशति दिनाङ्के भारतस्य संविधान-सभा संविधानम् अङ्गीकृतवती। यत् पञ्चाशत् अधिक नवदशशततमे वर्षे जनवरीमासस्य षड्विंशे दिनाङ्के प्रवृतम् अभवत्।

क्रिकेट

ऑस्ट्रेलियादेशस्य पर्थ-स्थले बॉर्डर-गावस्कर-ट्रॉफी-प्रतियोगिताया: क्रिकेट्-निकष-स्पर्धायां भारतेन ऑस्ट्रेलियादले पञ्चनवति। अधिक-द्विशतं धावनाङ्कै: विजय: प्राप्त:। जसप्रीत-बुमराह: प्लेयर ऑफ द मैच इति उपाधिं प्राप्तवान्।

।।इति वार्ता:।।